# Shri Devyatharvashirsham evaM Devyupanishat

# શ્રીદેવ્યથર્વશીર્ષં અથવા દેવ્યુપનિષત્

## Document Information

Text title : devyatharvashIrSham evaM devyupanishhat

File name : deviiatharva.itx

Category : atharvashIrSha, devii, pArvatI, devI, upanishhat

Location : doc_devii

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, PSA Easwaran

Latest update : June 15, 2004, Febraury 20, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 1, 2023

*sanskritdocuments.org*

# શ્રીદેવ્યથર્વશીર્ષં અથવા દેવ્યુપનિષત્

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

શ્રી ગણેશાય નમઃ ।
ૐ સર્વે વૈ દેવા દેવીમુપતસ્થુઃ કાસિ ત્વં મહાદેવીતિ ॥ ૧॥

સાઽબ્રવીદહં બ્રહ્મસ્વરૂપિણી । મત્તઃ પ્રકૃતિપુરુષાત્મકં જગત્ ।
શૂન્યં ચાશૂન્યં ચ ॥ ૨॥

અહમાનન્દાનાનન્દૌ । અહં વિજ્ઞાનાવિજ્ઞાને ।
અહં બ્રહ્માબ્રહ્મણી । દ્વે બ્રહ્મણી વેદિતવ્યે । var just વેદિતવ્યે
ઇતિ ચાથર્વણી શ્રુતિઃ । અહં પઞ્ચભૂતાનિ ।
અહં પઞ્ચતન્માત્રાણિ । અહમખિલં જગત્ ॥ ૩॥

વેદોઽહમવેદોઽહમ્ । વિદ્યાહમવિદ્યાહમ્ ।
અજાહમનજાહમ્ । અધશ્ચોર્ધ્વં ચ તિર્યક્ચાહમ્ ॥ ૪॥

અહં રુદ્રેભિર્વસુભિશ્ચરામિ । અહમાદિત્યૈરુત વિશ્વદેવૈઃ ।
અહં મિત્રાવરુણાવુભૌ બિભર્મિ । અહમિન્દ્રાગ્ની અહમશ્વિનાવુભૌ ॥ ૫॥

અહં સોમં ત્વષ્ટારં પૂષણં ભગં દધામિ ।
અહં વિષ્ણુમુરુક્રમં બ્રહ્માણમુત પ્રજાપતિં દધામિ ॥ ૬॥

અહં દધામિ દ્રવિણં હવિષ્મતે સુપ્રાવ્યે યજમાનાય સુન્વતે । var સુવ્રતે
અહં રાજ્ઞી સઙ્ગમની વસૂનાં ચિકિતુષી પ્રથમા યજ્ઞિયાનામ્ । var રાષ્ટ્રી
અહં સુવે પિતરમસ્ય મૂર્ધન્મમ યોનિરપ્સ્વન્તઃ સમુદ્રે ।
ય એવં વેદ । સ દૈવીં સમ્પદમાપ્નોતિ ॥ ૭॥

તે દેવા અબ્રુવન્ ।
નમો દેવ્યૈ મહાદેવ્યૈ શિવાયૈ સતતં નમઃ ।
નમઃ પ્રકૃત્યૈ ભદ્રાયૈ નિયતાઃ પ્રણતાઃ સ્મ તામ્ ॥ ૮॥

તામગ્નિવર્ણાં તપસા જ્વલન્તીં વૈરોચનીં કર્મફલેષુ જુષ્ટામ્ ।
દુર્ગાં દેવીં શરણં પ્રપદ્યામહેઽસુરાન્નાશયિત્ર્યૈ તે નમઃ ॥ ૯॥

દેવીં વાચમજનયન્ત દેવાસ્તાં વિશ્વરૂપાઃ પશવો વદન્તિ ।
સા નો મન્દ્રેષમૂર્જં દુહાના ધેનુર્વાગસ્માનુપ સુષ્ટુતૈતુ ॥ ૧૦॥

કાલરાત્રીં બ્રહ્મસ્તુતાં વૈષ્ણવીં સ્કન્દમાતરમ્ ।
સરસ્વતીમદિતિં દક્ષદુહિતરં નમામઃ પાવનાં શિવામ્ ॥ ૧૧॥

મહાલક્ષ્મ્યૈ ચ વિદ્મહે સર્વશક્ત્યૈ ચ ધીમહિ ।
તન્નો દેવી પ્રચોદયાત્ ॥ ૧૨॥

અદિતિર્હ્યજનિષ્ટ દક્ષ યા દુહિતા તવ ।
તાં દેવા અન્વજાયન્ત ભદ્રા અમૃતબન્ધવઃ ॥ ૧૩॥

કામો યોનિઃ કમલા વજ્રપાણિર્ગુહા હસા માતરિશ્વાભ્રમિન્દ્રઃ ।
પુનર્ગુહા સકલા માયયા ચ પુરૂચ્યૈષા વિશ્વમાતાદિવિદ્યોમ્ ॥ ૧૪॥

var ચાપૃથક્ ક્લેશા વિશ્વમાતાદિવિદ્યાઃ ॥

એષાઽઽત્મશક્તિઃ । એષા વિશ્વમોહિની । પાશાઙ્કુશધનુર્બાણધરા ।
એષા શ્રીમહાવિદ્યા । ય એવં વેદ સ શોકં તરતિ ॥ ૧૫॥

નમસ્તે।સ્તુ ભગવતિ માતરસ્માન્પાહિ સર્વતઃ ॥ ૧૬॥

સૈષા વૈષ્ણવ્યષ્ટૌ વસવઃ । સૈષૈકાદશ રુદ્રાઃ ।
સૈષા દ્વાદશાદિત્યાઃ । સૈષા વિશ્વેદેવાઃ સોમપા અસોમપાશ્ચ ।
સૈષા યાતુધાના અસુરા રક્ષાંસિ પિશાચા યક્ષા સિદ્ધાઃ ।
સૈષા સત્ત્વરજસ્તમાંસિ । સૈષા બ્રહ્મવિષ્ણુરુદ્રરૂપિણી ।
સૈષા પ્રજાપતીન્દ્રમનવઃ ।
સૈષા ગ્રહનક્ષત્રજ્યોતિઃકલાકાષ્ઠાદિવિશ્વરૂપિણી ।
var સૈષા ગ્રહનક્ષત્રજ્યોતીંષિ । કલાકાષ્ઠાદિવિશ્વરૂપિણી ।
તામહં પ્રણૌમિ નિત્યમ્ ।
પાપાપહારિણીં દેવીં ભુક્તિમુક્તિપ્રદાયિનીમ્ ।

અનન્તાં વિજયાં શુદ્ધાં શરણ્યાં શિવદાં શિવામ્ ॥ ૧૭॥ var સર્વદાં શિવામ્
વિયદીકારસંયુક્તં વીતિહોત્રસમન્વિતમ્ ।
અર્ધેન્દુલસિતં દેવ્યા બીજં સર્વાર્થસાધકમ્ ॥ ૧૮॥

એવમેકાક્ષરં મન્ત્રં યતયઃ શુદ્ધચેતસઃ । var એવમેકાક્ષરં બ્રહ્મ
ધ્યાયન્તિ પરમાનન્દમયા જ્ઞાનામ્બુરાશયઃ ॥ ૧૯॥

વાઙ્માયા બ્રહ્મસૂસ્તસ્માત્ ષષ્ઠં વક્ત્રસમન્વિતમ્ ।
var બ્રહ્મભૂસ્તસ્માત્
સૂર્યોઽવામશ્રોત્રબિન્દુસંયુક્તાષ્ટાત્તૃતીયકમ્ ।
નારાયણેન સંમિશ્રો વાયુશ્ચાધારયુક્તતઃ ।
વિચ્ચે નવાર્ણકોઽર્ણઃ સ્યાન્મહદાનન્દદાયકઃ ॥ ૨૦॥

var નવાર્ણકોણસ્ય મહાનાનન્દદાયકઃ
હૃત્પુણ્ડરીકમધ્યસ્થાં પ્રાતઃસૂર્યસમપ્રભામ્ ।
પાશાઙ્કુશધરાં સૌમ્યાં વરદાભયહસ્તકામ્ ।
ત્રિનેત્રાં રક્તવસનાં ભક્તકામદુઘાં ભજે ॥ ૨૧॥ var ભક્તકામદુહં
નમામિ ત્વાં મહાદેવીં મહાભયવિનાશિનિમ્ ।
var ભજામિ ત્વાં મહાદેવિ મહાભયવિનાશિનિ ।
મહાદુર્ગપ્રશમનીં મહાકારુણ્યરૂપિણીમ્ ॥ ૨૨॥ var મહાદારિદ્ર્યશમનીં
યસ્યાઃ સ્વરૂપં બ્રહ્માદયો ન જાનન્તિ તસ્માદુચ્યતે અજ્ઞેયા ।
યસ્યા અન્તો ન લભ્યતે તસ્માદુચ્યતે અનન્તા ।
યસ્યા લક્ષ્યં નોપલક્ષ્યતે તસ્માદુચ્યતે અલક્ષ્યા ।
યસ્યા જનનં નોપલક્ષ્યતે તસ્માદુચ્યતે અજા ।
એકૈવ સર્વત્ર વર્તતે તસ્માદુચ્યતે એકા ।
એકૈવ વિશ્વરૂપિણી તસ્માદુચ્યતે નૈકા । var તસ્માદુચ્યતેઽનેકા ।
અત એવોચ્યતે આજ્ઞેયાનન્તાલક્ષ્યાજૈકા નૈકેતિ ॥ ૨૩॥

var આજ્ઞેયાઽનન્તાલક્ષ્યાજૈકાનેકા
મન્ત્રાણાં માતૃકા દેવી શબ્દાનાં જ્ઞાનરૂપિણી ।
જ્ઞાનાનાં ચિન્મયાતીતા શૂન્યાનાં શૂન્યસાક્ષિણી । var ચિન્મયાનન્દા
યસ્યાઃ પરતરં નાસ્તિ સૈષા દુર્ગા પ્રકીર્તિતા ॥ ૨૪॥

તાં દુર્ગાં દુર્ગમાં દેવીં દુરાચારવિઘાતિનીમ્ ।
નમામિ ભવભીતોઽહં સંસારાર્ણવતારિણીમ્ ॥ ૨૫॥

ઇદમથર્વશીર્ષં યોઽધીતે સ પઞ્ચાથર્વશીર્ષફલમાપ્નોતિ ।
ઇદમથર્વશીર્ષમજ્ઞાત્વા યોઽર્ચાં સ્થાપયતિ ।
શતલક્ષં પ્રજપ્ત્વાઽપિ સોઽર્ચાસિદ્ધિં ન વિન્દતિ ।
var  નાઽર્ચાશુદ્ધિં ચ વિન્દતિ
શતમષ્ટોત્તરં ચાસ્ય પુરશ્ચર્યાવિધિઃ સ્મૃતઃ ।
દશવારં પઠેદ્યસ્તુ સદ્યઃ પાપૈઃ પ્રમુચ્યતે ।
મહાદુર્ગાણિ તરતિ મહાદેવ્યાઃ પ્રસાદતઃ ॥ ૨૬॥

સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ ।
પ્રાતરધીયાનો રાત્રિકૃતં પાપં નાશયતિ ।
સાયં પ્રાતઃ પ્રયુઞ્જાનોઽપાપો ભવતિ ।
નિશીથે તુરીયસંધ્યાયાં જપ્ત્વા વાક્સિદ્ધિર્ભવતિ ।
નૂતનાયાં પ્રતિમાયાં જપ્ત્વા દેવતાસાંનિધ્યં ભવતિ ।
પ્રાણપ્રતિષ્ઠાયાં જપ્ત્વા પ્રાણાનાં પ્રતિષ્ઠા ભવતિ ।
ભૌમાશ્વિન્યાં મહાદેવીસંનિધૌ જપ્ત્વા મહામૃત્યું
તરતિ સ મહામૃત્યું તરતિ ।
ય એવં વેદ ॥ ઇત્યુપનિષત્ ॥ ૨૭॥

ઇતિ દેવ્યથર્વશીર્ષં સમ્પૂર્ણમ્ ॥

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com, NA, PSA Easwaran

*Shri Devyatharvashirsham evaM Devyupanishat*
pdf was typeset on December 1, 2023

Please send corrections to *sanskrit@cheerful.com*